


# केरलपाठावलिः

# संस्कृतम्

## अष्टमी कक्ष्या

### संस्कृतविद्यालयानां कृते

## KERALA READER - SANSKRIT

### STANDARD VIII

For Sanskrit Schools only

Government of Kerala
Department of Education

KT 285-1/Sanskrit - 8 (O/S)

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड उत्कल बंगा,
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव- जय गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
First Edition: 2015, Reprint: 2016
Typesetting and Layout: SCERT
Printed at : KBPS, Kakkanad, Kochi-30
Department of Education, Government of Kerala

# भूमिका

प्रियच्छात्र!

प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति अस्माकं पाठ्यपद्धतिः। तदनुसृत्य छात्राणां सर्वतोमुखविकासं लक्ष्यीकृत्य पाठ्यक्रमः स्वीकृतः अस्ति। पाठ्यक्रमे अद्वितीयं भवति पाठपुस्तकम्। भाषापराणां नैपुणीनां विकासाय स्वयं पठनाय च पाठपुस्तकम् उपकरोति।

विविधव्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः वर्तन्ते। पठितानाम् आशयानां प्रबलीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयंमूल्यनिर्णयाय च अवसराः यथायोग्यं दत्ताः।

भाषापठनम् अनायासं सुखप्रदं च कर्तुं पाठपुस्तकमिदं प्रयोजकमिति चिन्तयामि। वर्णमनोहराणि चित्राणि छात्रमनांसि आकर्षन्ति नूनम्। संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

**डा॰ पी.ए फत्तिमा**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः

# TEXT BOOK DEVELOPMENT COMMITTEE

## SANSKRIT STANDARD VIII

### PARTICIPANTS

1. **Lekha. K**, H.S.A , S.N.V.S H.S Thrikkaruva, Kollam-691602
2. **Rajalekshmi Pillai.S**, H.S.A , H.S for Boys, Thevalakkara, Kollam
3. **Alice.O**, H.S.A ,S.V.H.S.S Clappana, Kollam
4. **S. SreeKumar**, P.P.M. H.S, Karakonam,Thiruvananthapuram
5. **S. Unnikrishnan Nair** . B.R.C Trainer (Rtd.) Charippurathuplavila veedu, Edackidom P.O, Kollam
6. **N. Aravindakshan**, GUPS Mangaram, Pandalam, Pathanamthitta.

### EXPERTS

1. **Prof. Madhavan Pillai. V**, Associate Professor in Sanskrit (Rtd.) Govt. College for Women.
2. **Dr.T.D Suneethi Devi**, Special Officer (Sanskrit) DPI, Kerala.
3. **Ramachandran.N.K**, District Education Officer (Rtd.)

### ADVISOR

1. **Dr. R. Vasudevan Potti**, Professor (Rtd), Govt. Sanskrit College, Thiruvananthapuram

### ARTISTS

1. **Rajeevan Parayil,** Azhikkode H.S, Kannur
2. **Varghese Kalathil**, G.H.S.S Pallikkunnu, Kannur
3. **Balakrishnan Achary.P.G**, Lecturer (Rtd.) D.I.E.T

### Academic Co ordinator

**Dr.Shameeja.P**
Research Officer (Sanskrit) SCERT


राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING , KERALA

# विषयानुक्रमणिका


| क्रमसंख्या | पाठस्य नाम | | पुटसंख्या |
|---|---|---|---|
| | **एककम्-१ भारतीया संस्कृतिः** | | |
| १. | मन्दाकिनीवर्णना | (काव्यम्) | ७ |
| २. | अपौरुषेयो वेदः | (उपन्यासः) | २४ |
| ३. | शब्दमात्रात् न भेतव्यम् | (कथा) | ३२ |
| | **एककम्-२ मुखं व्याकरणम्** | | |
| ४. | संज्ञाप्रकरणम् | (व्याकरणम्) | ४५ |
| | **एककम्-३ काव्यभूषणम्** | | |
| ५. | अलङ्काराः | (विवरणम्) | ५५ |
| ६. | वृत्तपरिचयः | (विवरणम्) | ६१ |


KT 285-2/ Sanskrit - 8 (O/S)

# एककम्-१

# भारतीया संस्कृतिः

भारतीयसंस्कृतेः जीवातुभूता भवति संस्कृतभाषा। वेदवेदाङ्ग- पुराण- इतिहासादिभिः सम्पन्ना भवति भारतीयसंस्कृतिः। आदिकवेः वाल्मीकेः विश्वोत्कृष्टं महाकाव्यं भवति रामायणम्। न केवलं भारतसंस्कृतेः किन्तु विश्वसंस्कृतेः आदर्शभूतं भवति वाल्मीकिरामायणम्। अत्र रामायणात् स्वीकृता मन्दाकिनीवर्णना वर्तते। वेदवेदाङ्गानां सामान्यज्ञानाय एकः लघूपन्यासः समायोजितः। सांस्कृतिकमण्डले सर्वोन्नतस्थानाय अर्हा भवति पञ्चतन्त्रकथा। तादृशी एका कथा अत्र समायोजिता।

**पठनाधिगमाः**

* काव्यम् आलपति।
* अन्वयम् आशयं च वदति लिखति च।
* काव्यं छन्दोबद्धतापूर्वकम् आलपति।
* उपन्यासं पठति।
* कथासंक्षेपं लिखति।
* सम्बोधनरूपाण्युपयुज्य सम्भाषणं लिखति।
* वाक्यानि परिवर्त्य लिखति। (कर्तरि, कर्मणि च)

# प्रथमः पाठः

# मन्दाकिनीवर्णना



आदिकविः वाल्मीकिः, आदिकाव्यं रामायणम् इति विश्वप्रसिद्धमेव। काव्येऽस्मिन् षट् काण्डाः विद्यन्ते। ते बालकाण्डः अयोध्याकाण्डः, अरण्यकाण्डः, किष्किन्धाकाण्डः सुन्दरकाण्डः, युद्धकाण्डः च भवन्ति। तत्र अयोध्याकाण्डात् उद्धृतोऽयं भागः।

पितुराज्ञां पालयितुं वनं प्राप्तः सीतालक्ष्मणसमेतः श्रीरामः चित्रकूटपर्वते अवसत्। ततः प्रवहन्तीं मन्दाकिनीं नदीं दृष्ट्वा तस्याः नद्याः मनोहारितां सीतायै प्रदर्शयति रामः। एषः काव्यसन्दर्भः अत्र सङ्कलितः।

**१. अथ शैलाद् विनिष्क्रम्य मैथिलीं कोसलेश्वरः।**
**अदर्शयच्छुभजलां रम्यां मन्दाकिनीं नदीम्॥**

**पदच्छेदः**

अदर्शयच्छुभजलाम् - अदर्शयत् + शुभजलाम्

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अथ | अनन्तरम् |
| कोसलेश्वरः | श्रीरामः |
| शैलात् | पर्वतात् |
| विनिष्क्रम्य | अवतीर्य |
| मैथिलीम् | सीताम् |
| शुभजलाम् | शुद्धजलाम् |
| रम्याम् | मनोहराम् |
| मन्दाकिनीं नदीम् | मन्दाकिनी नामिकां नदीम् (गङ्गाम्) |
| अदर्शयत् | दर्शयामास। |

**सारः**-अनन्तरं कोसलाधिपतिः श्रीरामः चित्रकूटपर्वतात् अवतीर्य शुद्धजलनिर्भरां मनोहारिणीं मन्दाकिनीं नदीं सीताम् अदर्शयत्।

**विग्रहः**

मैथिलीम् - मिथिलायाः अपत्यं स्त्री मैथिली, ताम् ।

कोसलेश्वरः - कोसलानाम् ईश्वरः ।

**क्रियापदम्-** अदर्शयत् - दृशिर् (दृश्)धातोः णिजन्ते लङ् परस्मैपदि प्र. पु. ए. व।

अदर्शयत् अदर्शयताम् अदर्शयन्।

**कोशः** पर्वतः - महीध्रेशिखरिक्ष्माभृदहार्यधरपर्वताः।

अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः।।

**२. अब्रवीच्च वरारोहां चन्द्रचारुनिभाननाम्।**
**विदेहराज्यस्य सुतां रामो राजीवलोचनः।।**

**पदच्छेदः**

अब्रवीच्च - अब्रवीत् + च।

रामो राजीवलोचनः - रामः + राजीवलोचनः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| राजीवलोचनः | - | कमलनयनः |
| रामः | - | श्रीरामः |
| वरारोहाम् | - | सुन्दरीम् |

| | | |
|---|---|---|
| चन्द्रचारुनिभाननाम् | - | चन्द्रसमानमुखीम् |
| विदेहराजस्य | - | जनकमहाराजस्य |
| सुताम् | - | पुत्रीम् |
| अब्रवीत् च | - | उवाच च |

**सारः**- राजीवलोचनः श्रीरामः चन्द्रसदृशमुखीं विदेहराजस्य जनकस्य पुत्रीं सुन्दरीं सीतादेवीम् उवाच।

**विग्रहः**

| | | |
|---|---|---|
| राजीवलोचनः | - | राजीवे इव लोचने यस्य सः। |
| विदेहराजस्य | - | विदेहानां राजा विदेहराजः तस्य। |

**क्रियापदम्**

अब्रवीत्- ब्रूञ् (व्यक्तायां वाचि) धातोः लङ् परस्मैपदी प्र. पु. ए.व।

अब्रवीत्     अब्रूवताम्     अब्रुवन्।

लटि रूपम्- ब्रवीति।

३.  **विचित्रपुलिनां रम्यां हंससारससेविताम्।**
**कुसुमैरुपसम्पन्नां पश्य मन्दाकिनीं नदीम्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| कुसुमैरुपसम्पन्नाम् | - | कुसुमैः + उपसम्पन्नाम् |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| विचित्रपुलिनाम् | मनोहरसैकतसहिताम् |
| रम्याम् | चेतोहराम् |
| हंससारससेविताम् | हंसैः बकैः च सेविताम् |
| कुसुमैः उपसम्पन्नाम् | विभिन्नपुष्पैः विभूषिततटाम् |
| मन्दाकिनीम् | गङ्गाम् |
| नदीम् | तटिनीम् |
| पश्य | त्वं पश्य। |

**सारः**- हे मैथिलि! सुन्दरैः पुलिनैः युक्तां विविधैः पुष्पैरलंकृतां गङ्गानदीं पश्य।

**विग्रहः**

हंससारससेविताम् - हंसैः सारसैः च सेविता हंससारससेविता, ताम्।

विचित्रपुलिनाम् - विचित्रं पुलिनं यस्याः सा विचित्रपुलिना, ताम्।

**क्रियापदं**- पश्य दृशिर् प्रेक्षणे परस्मैपदी लोट् म. पु. ए. व

पश्य पश्यतात् पश्यतम् पश्यत।

लटि रूपं- पश्यति।

४. **नानाविधैस्तीररुहैर्वृतां पुष्पफलद्रुमैः।**
**राजन्तीं राजराजस्य नलिनीमिव सर्वतः।।**

**पदच्छेदः**

नानाविधैस्तीररुहैर्वृताम् - नानाविधैः +तीररुहैः + वृताम्।

नलिनीमिव - नलिनीम् +इव

| अन्वयः | अन्वयार्थः |
|---|---|
| नानाविधैः | विभिन्नैः |
| तीररुहैः | तटजैः |
| पुष्पफलद्रुमैः | कुसुमफलयुक्तैः वृक्षैः |
| वृतां | परिवृताम् |
| राजराजस्य | कुबेरस्य |
| नलिनीम् इव | पद्मिनीम् इव (मानससर इव) |
| सर्वतः | सर्वत्र |
| राजन्तीं | विलसन्तीम् |
| | मन्दाकिनीं नदीम् (पश्य) |

**सारः-** गङ्गायाः तीरं पुष्पफलनिर्भरैः वृक्षैः परिवृतं मनोहरं च भवति। तद् कुबेरस्य पद्मिनीमिव शोभते। (तत् पश्य)।

**विग्रहः**

तीररुहैः - तीरे रुहन्ति इति तीररुहः, तैः।

राजराजस्य- राज्ञां राजा राजराजः, तस्य।

पुष्पफलद्रुमैः- पुष्पाणि फलानि पुष्पफलानि तैः युक्तः द्रुमः पुष्पफलद्रुमः, तैः।

**व्याकरणविशेषः-** राजराजस्य इत्यत्र समासान्तस्थितस्य राजन् शब्दस्य टच्प्रत्ययान्तत्वं (अकारान्तः) लभते।

**कोशः** द्रुमः- वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।
अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः।।

५. **जटाजिनधराः काले वल्कलोत्तरवाससः।**
**ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये।।**

**पदच्छेदः**

ऋषयस्त्ववगाहन्ते - ऋषयः + तु + अवगाहन्ते ।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| प्रिये | - | हे प्रिये, (सीते) |
| जटाजिनधराः | - | जटां मृगचर्म च धरन्तः (धरणशीलाः)। |
| वल्कलोत्तरवाससः | - | वृक्षचर्मणा कृतोत्तरीयाः |
| ऋषयः तु | - | मुनयः तावत् |
| काले | - | यथाकालम् |
| मन्दाकिनीं नदीं | - | गङ्गानदीम् |
| अवगाहन्ते | - | प्राप्नुवन्ति निमज्जन्ति च। |

**सारः**- हे सीते! चित्रकूटवासिनः महर्षयः यथाकालं मन्दाकिनीं स्नानार्थम् आश्रयन्ते।

**विग्रहः**

जटाजिनधराः - जटाम् अजिनं च धरन्ति इति जटाजिनधराः।

वल्कलोत्तरवाससः- वल्कलम् एव उत्तरवासः येषां ते।

**क्रियापदं-** अव गाह् विलोडने आत्मनेपदी लट् प्र पु ब. व

| | | |
|---|---|---|
| अवगाहते | अवगाहेते | अवगाहन्ते। |

६. **आदित्यमुपतिष्ठन्ते नियमादूर्ध्वबाहवः।**
**एतेऽपरे विशालाक्षि मुनयः संश्रितव्रताः।।**

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| आदित्यमुपतिष्ठन्ते | - | आदित्यम् | + | उपतिष्ठन्ते। |
| नियमादूर्ध्वबाहवः | - | नियमात् | + | ऊर्ध्वबाहवः। |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| विशालाक्षि | - | हे सुन्दरि! (सीते!) |
| संश्रितव्रताः | - | नियतव्रतयुक्ताः |
| एतेऽपरे मुनयः | - | इतरे केचन ऋषयः |
| ऊर्ध्वबाहवः | - | मस्तके अञ्जलीं विधाय |
| नियमात् | - | नियमेन (नित्यम्) |
| आदित्यम् | - | सूर्यदेवम् |
| उपतिष्ठन्ते | - | उपासते। (पूजयन्ति) |

**सारः-** हे सीते! त्वं पश्य। केचन ऋषयः मन्दाकिनीं प्राप्य बद्धाञ्जलयः भूत्वा सूर्यं नमस्कुर्वन्ति।

**विग्रहः**

विशालाक्षि- विशाले अक्षिणी यस्याः सा विशालाक्षी तत्सम्बुद्धौ।

संश्रितव्रताः - संश्रितः व्रतः यैः ते।

**क्रियापदं**- उपतिष्ठन्ते- उप+ ष्ठा गतिनिवृत्तौ (स्था) धातोः आत्मनेपदी लट्

प्र पु ब व

उपतिष्ठते उपतिष्ठेते उपतिष्ठन्ते।

**व्याकरणविशेषः**

'उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यम्' इति वार्तिकेन देवपूजार्थे उपेत्यस्य योगे स्था धातोः आत्मनेपदम्।

७. **मारुतोद्धूतशिखरैः प्रनृत्त इव पर्वतः।**
**पादपैः पुष्पपत्राणि सृजद्भिरभितो नदीम्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| प्रनृत्त इव | - | प्रनृत्ते + इव। |
| सृजद्भिरभितः | - | सृजद्भिः + अभितः |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| मारुतोद्धूतशिखरैः | - | वायुना चञ्चलितशिखरैः |
| पुष्पपत्राणि | - | कुसुमानि पर्णानि च |
| नदीम् | - | मन्दाकिनीं नदीम् |
| अभितः | - | उभयतः |
| सृजद्भिः | - | वितरद्भिः |

| | | |
|---|---|---|
| पादपैः | - | वृक्षैः |
| पर्वतः | - | चित्रकूटः |
| प्रनृत्त इव | - | नृत्यति इव भासते। |

**सारः-** चित्रकूटपर्वते अनेके वृक्षाः सन्ति। ते सर्वे पुष्पैः फलैः पत्रैः च पूर्णाः। वायोः चालनेन वृक्षेभ्यः पुष्पाणि फलानि च मन्दाकिन्यां पतन्ति। अतः पर्वतः नृत्यति इव प्रतिभाति।

**विग्रहः-**

पुष्पपत्राणि- पुष्पाणि पत्राणि च।

मारुतोद्धूतशिखरैः- मारुतेन उद्धूतः शिखरः यस्य सः तैः।

पादपः- पादेन पिबतीति।

व्याकरणविशेषः-

नदीम् अभितः- अभितः इति शब्दस्य योगे द्वितीया विभक्तिः।

८. **क्वचिन्मणिनिकाशोदां क्वचित् पुलिनशालिनीम्।**
**क्वचित् सिध्दजनाकीर्णां पश्य मन्दाकिनीं नदीम्।।**

**पदच्छेदः**

क्वचिन्मणिनिकाशोदाम् - क्वचित् + मणिनिकाशोदाम्

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| क्वचित् | - | कुत्रचित् स्थाने |

| | | |
|---|---|---|
| मणिनिकाशोदाम् | - | माणिक्यवत् शोभायुक्तजलसहिताम् |
| क्वचित् | - | कुत्रचित् (अन्यत्र) |
| पुलिनशालिनीं क्वचित् | - | सैकतसहितां क्वचित् |
| सिद्धजनाकीर्णा | - | मुनिभिः संसेविताम् |
| मन्दाकिनीम् | - | गङ्गाम् |
| नदीम् | - | तटिनीम् |
| पश्य | - | अवलोकय। |

**सारः**- मन्दाकिन्याः एकत्र माणिक्यसमजलयुक्तप्रदेशाः। अपरत्र तीरप्रदेशाः। अन्यत्र मुनिजनैः सेविताः प्रदेशाः, तादृशीं नदीं त्वमवलोकय।

**विग्रहः**-

सिद्धजनाकीर्णां सिद्धजनैः आकीर्णा - सिद्धजनाकीर्णा, ताम्।

९. **दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने।**
**अधिकं पुरवासाच्च मन्ये तव च दर्शनात्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| मन्दाकिन्याश्च | - | मन्दाकिन्याः + च । |
| पुरवासाच्च | - | पुरवासात् + च । |

| | | |
|---|---|---|
| **अन्वयः** | | **अन्वयार्थः** |
| शोभने | - | हे सुन्दरि! |

| | | |
|---|---|---|
| चित्रकूटस्य | - | चित्रकूटपर्वतस्य |
| मन्दाकिन्याः च | - | गङ्गानद्याः च |
| दर्शनम् | - | अवलोकनम् |
| पुरवासात् | - | नगरवासात् (अयोध्यावासात्) |
| तव दर्शनात् च | - | सीतादर्शनात् च |
| अधिकं | - | अतीव प्रियङ्करम् |
| मन्ये | - | चिन्तयामि। |

**सारः**- हे सीते ! चित्रकूटस्य गङ्गायाः च दर्शनम् अयोध्यावासात् तव दर्शनात् च श्रेयस्करमिति अहं चिन्तयामि।

**विग्रहः**-

पुरे वासः पुरवासः तस्मात् पुरवासात्।

**क्रियापदम्**- मन्ये (मन अवबोधने आत्मनेपदी लट् उत्तमपुरुष एकवचनम्।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | मन्यते | मन्येते | मन्यन्ते। |
| म.पु | मन्यसे | मन्येथे | मन्यध्वे। |
| उ.पु | मन्ये | मन्यावहे | मन्यामहे। |

**१०. सखीवच्च विगाहस्व सीते मन्दाकिनीं नदीम्।**
**कमलान्यवमज्जन्ती पुष्कराणि च भामिनि।।**

**पदच्छेदः**

सखीवच्च - सखीवत् + च ।

कमलान्यवमज्जन्ती- कमलानि + अवमज्जन्ती ।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| भामिनि सीते ! | - | हे सुन्दरि! सीते! |
| कमलानि | - | अम्बुजानि |
| पुष्कराणि च | - | नीलसरोरुहाणि च |
| सखीवत् | - | प्रियसखी इव |
| अवमज्जन्ती | - | निमज्जन्ती (निमज्जनं कुर्वन्ती) |
| मन्दाकिनीम् | - | गङ्गाम् |
| नदीम् | - | तटिनीम् |
| विगाहस्व | - | निमज्ज |

**सारः**- हे सीते , त्वं गङ्गायां श्वेतकमलानि नीलकमलानि च सखी इव जलान्दोलनेन निमज्जन्ती भूत्वा स्नानं कुरु।

**क्रियापदम्**- विगाहस्व- वि गाह् अवगाहने आत्मनेपदी लोट् म पु ए व

विगाहस्व विगाहेथां विगाहध्वम्।

# पठनप्रवर्तनानि



### श्लोकान् विविधताललयानुसारम् आलपतु।

*श्रद्धेयाः अंशाः*

स्पष्टतया आलपनम्।

आशयावबोधः।

पदविश्लेषणम्।



### काव्यभागं पठित्वा अन्वयं लिखतु।

*श्रद्धेयाः अंशाः।*

आशयावबोधः।

नूतनपदानाम् अर्थग्रहणम्।

कर्तृक्रियासम्बन्धग्रहणम्।



### काव्यभागं पठित्वा मन्दाकिनीनदीवर्णनं स्ववाक्यैः लिखतु।

*श्रद्धेयाः अंशाः।*

आशयपूर्णता।

वाक्यघटना।

भावात्मकता।



**पाठभागे भवताम् इष्टतमः श्लोकः क? कारणं किम्? लिखतु।**

*श्रद्धेयाः अंशाः।* आशयस्पष्टता।

युक्तता।

आस्वादनशक्तिवर्धनम्।



**मन्दाकिनीवर्णनां पठित्वा चर्चां कृत्वा नद्यः अस्मत्संस्कृतेः पोषिकाः इति विषयम् अधिकृत्य टिप्पणीं लिखतु।**

*श्रद्धेयाः अंशाः-* आशयावबोधः।

वाक्यघटना।

भाषाप्रयोगः।



**पाठभागं पठित्वा रामः सीतां कथं सम्बोधयति इति चित्वा लिखतु?**

*श्रद्धेयः अंशः-* सम्बोधनान्तरूपप्रयोगपाटवम्।

**अधोदत्तं श्लोकं पठित्वा आशयम् अधिकृत्य चर्च ंकरोतु।**

दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने।
अधिकं पुरवासाच्च मन्ये तव च दर्शनात्।।

*श्रद्धेयाः अंशाः-* आशयावबोधः।

उचिताशयप्रकटनम्।

भागभागित्वम्।

**धातुपरिचयः**

उप +ष्ठा गतिनिवृत्तौ आत्मनेपदी लट्

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | उपतिष्ठते | उपतिष्ठेते | उपतिष्ठन्ते। |
| म.पु | उपतिष्ठसे | उपतिष्ठेथे | उपतिष्ठध्वे। |
| उ.पु | उपतिष्ठे | उपतिष्ठावहे | उपतिष्ठामहे। |

**वि +गाह् अवगाहने आत्मनेपदी लोट्**

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | विगाहतां | विगाहेतां | विगाहन्तां |
| म.पु. | विगाहस्व | विगाहेथां | विगाहध्वं |
| उ.पु | विगाहै | विगाहावहै | विगाहामहै। |

# किमधिगतम्

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | श्लोकः तालानुसारम् आलपितः। | | | | |
| २. | अन्वयलेखनं कृतम्। | | | | |
| ३. | मन्दाकिनीनदीवर्णनालेखनं कृतम्। | | | | |
| ४. | इष्टतमश्लोकलेखनं कारणं च प्रकाशिकम्। | | | | |
| ५. | टिप्पणीलेखनं कृतम्। | | | | |
| ६. | सम्बोधनान्तपदलेखनं कृतम्। | | | | |
| ७. | चर्चा कृता। | | | | |

*

१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

# द्वितीयः पाठः

# अपौरुषेयो वेदः

भारतीयसंस्कृतिः लोकोत्तरा भवति। सा च अतिपुरातनी अनितरसाधारणी च। तत्र च वेदवेदाङ्गादिचतुर्दशविद्याः प्रसिद्धाः।



## वेदाः

वैदिकसाहित्यम् अतिप्राचीनं महत्तमं भारतीयवाङ्मयं भवति। तत् भारतीयसंस्कृतेः सनातनधर्मस्य च मूलस्तम्भ एव। अपौरुषेयं वाक्यं वेदः इति प्रसिद्धः अस्ति। विद्यन्ते धर्मादयः पुरुषार्थाः यैस्ते वेदा इति। क्रान्तदर्शिनां महर्षिणां मनसि प्रत्यक्षीभूतः परमो धर्म एव वेद इति आचार्येण यास्केन उक्तम्।

वेदाश्चत्वारः। ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च। प्रतिवेदं संहिता, ब्राह्मणम्, आरण्यकम् उपनिषद् चेति चत्वारः भागाः सन्ति।

ऋक् इति वेदमन्त्रः भवति। ऋच्यन्ते स्तूयन्ते देवाः अनया इति ऋक्। तादृशीनां ऋचां समूह एव ऋग्वेदः। देवताराधना इत्यर्थकात् यज् धातोः यजुस् याग इति पदयोः व्युत्पत्तिः। यजुर्वेदः गद्यपद्यमिश्रणेन रचितः। तृतीयः वेदः सामवेदः। सामवेदात् संगीतस्य उत्पत्तिः इति कथ्यते। अतः संगीतस्य चरित्रज्ञानाय सामवेदपठनम् उपकरोति। चतुर्थस्तु अथर्ववेदः। अस्य प्राचीननाम अथर्वाङ्गिरसः इति। सामान्यजनानाम् आचारानुष्ठानानि अथर्ववेदे प्रतिपादितानि दृश्यन्ते। आयुर्वेदस्य उत्पत्तिः अपि अथर्ववेदाद् भवति इति श्रूयते।

## वेदाङ्गानि।

वेदानाम् अनुबन्धतया षड् विज्ञानशाखाः वर्तन्ते। ता एव वेदाङ्गानि इत्यभिधीयन्ते। यथा-

शिक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषं तथा।

कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः।। इति।

वेदाध्ययनाय तद्व्याख्यानाय यागादिकर्मणां सम्यगनुष्ठानाय च सहायकानि भवन्ति वेदाङ्गानि। एतानि वेदार्थज्ञानसाधनानि वर्तन्ते। पाणिनीयशिक्षायां वेदस्य मूर्तिमत्वं परिकल्प्य तस्य मूर्तेः नेत्राद्यङ्गभूतानि शिक्षादीनि इति वर्ण्यते।

उक्तं च -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।

तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ।। इति।

अर्थात् छन्दः वेदस्य पादौ , कल्पः हस्तौ, चक्षुः ज्योतिषामयनमेव , निरुक्तं तु श्रोत्रमिति। शिक्षा वेदस्य घ्राणं व्याकरणं मुखमिति च स्मृतम्। तस्माद् वेदान् साङ्गम् अधीत्य ब्रह्मलोके महत्वं प्राप्यते।

**पदच्छेदः**

| | | |
|---|---|---|
| वेदाश्चत्वारः | - | वेदाः +चत्वारः। |
| चेति | - | च+ इति। |
| चतुर्थस्तु | - | चतुर्थः + तु। |
| इत्यभिधीयन्ते | - | इति +अभिधीयन्ते। |
| कल्पश्चेति | - | कल्पः+च + इति। |

वेदस्याहुः - वेदस्य +आहुः।

अधीत्यैव - अधीत्य + एव।

**विग्रहः**

वेदाङ्गानि - वेदानाम् अङ्गानि।

भारतीयवाङ्मयम् - भारतीयं वाङ्मयम्।

प्रतिवेदम् - वेदं वेदं प्रति।

चरित्रज्ञानाय - चरित्रसंबन्धिज्ञानं चरित्रज्ञानं, तस्मै।

विज्ञानशाखाः - विज्ञानस्य शाखाः।

अपौरुषेयम् - पुरुषस्य इदं पौरुषं, पौरुषसंबन्धि पौरुषेयं, न पौरुषेयम् अपौरुषेयम्।

**क्रियापदानि।**

भवति- भूधातुः परस्मैपदि लट् प्रथमपुरुष एकवचनम्।

भवति भवतः भवन्ति।

अस्ति-अस् धातुः परस्मैपदी लट् प्रथमपुरुष एकवचनम्।

अस्ति स्तः सन्ति।

अभिधीयन्ते - अभि धाञ् धातुः कर्मणि आत्मनेपदी लट् प्रथमपुरुष बहुवचनम्।

अभिधीयते अभिधीयेते अभिधीयन्ते।

आहुः - ब्रूञ् परस्मैपदी लट् प्रथमपुरुषबहुवचनम्।

आह आहतुः आहुः।

वर्तन्ते - वृत् धातु आत्मनेपदी लट् प्रथमपुरुषबहुवचनम्।

वर्तते वर्तेते वर्तन्ते।

## पठनप्रवर्तनानि।



अधः प्रदत्तां पट्टिकां पूर्तीकरोतु।

| लट् | लङ् | लृट् |
|---|---|---|
| भवति | अभवत् | भविष्यति |
| अस्ति | | |
| करोति | | |

*श्रद्धेयाः अंशाः* आशयावगमः

कालबोधः।

क्रियायाः घटना।

क्रमीकृत्य लेखनम्।



उपन्यासं पठित्वा अधः प्रदत्तविषयानधिकृत्य लघुटिप्पणीं लिखतु।

१. यजुर्वेदः

२. छन्दः।

३. कल्पः।

*श्रद्धेयाः अंशाः*	आशयावबोधः

उचिता शैली।

क्रमीकृत्य लेखनम्।



**पाठभागात् अव्ययपदानि चित्वा वाक्यानि रचयतु।**

*श्रद्धेयाः अंशाः*	अव्ययविवेचनम्।

क्रमीकरणं

वाक्यप्रयोगः।



**सूचनायाः साहाय्येन वेदाङ्गान्यधिकृत्य लघूपन्यासं लिखतु।**

सूचना-

विज्ञानशाखाः

वेदाङ्गानां नामानि

छन्दः पादौ ...... इत्यादि

*श्रद्धेयाः अंशाः*	आशयपूर्णता

भाषा शैली

वाक्यघटना।



**आयुर्वेदः इति विषयमधिकृत्य एकं लघूपन्यासं लिखतु।**

*श्रद्धेयाः अंशाः-*	उपन्यासस्वरूपम्

उचितं शीर्षकम्।

आशयावबोधः



**इतरान् धर्मग्रन्थान् अधिकृत्य चर्चां कृत्वा पट्टिकारूपेण लिखत।**

**धर्मग्रन्थाः**

| हिन्दुधर्मः | इस्लामधर्मः | क्रिस्तुधर्मः |
|---|---|---|
| | | |

**किमधिगतम्**

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशः निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | लकाराणां पट्टिकाकरणं कृतम्। | | | | |
| २. | लघुटिप्पणीलेखनं कृतम्। | | | | |
| ३. | अव्ययपदानि उपयुज्य वाक्यलेखनं कृतम्। | | | | |
| ४. | उपन्यासलेखनं कृतम्। | | | | |
| ५ | दत्तविषयमधिकृत्य उपन्यासलेखनं कृतम्। | | | | |
| ६. | धर्मग्रन्थानां पट्टिकाकरणं कृतम्। | | | | |


*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

# तृतीयः पाठः
# शब्दमात्रात् न भेतव्यम्

पञ्चतन्त्रमुपजीव्य कृतस्य हितोपदेशस्य भारते अधिकप्रचारः दृश्यते। कस्यापि राज्ञः धवलचन्द्रस्य सभावासिनः नारायणस्य कृतिः भवति हितोपदेशः। पुस्तकस्यास्य कालः क्रिस्तोः परं नवमचतुर्दश शतकयोः मध्ये एव आसीत् इति वक्तुं शक्यते।

श्रीपर्वतस्य समीपे चित्रपुरं नाम किमपि नगरम् आसीत्। तत्र घण्टाकर्णः नाम राक्षसः प्रत्यवसत् इति जनानां विश्वासः।

अथैकदा कश्चन चोरः मन्दिरात् बहूनि वस्तूनि चोरयित्वा वनं गतः। व्याघ्रस्य आक्रमणेन सः हतः।



तदा तेन अपहृतानि वस्तूनि वने अपतन्। अन्यस्मिन् दिने केचन वानराः तत्र आगच्छन्। कुतूहलेन तेषु वस्तुषु एकां घण्टां हस्ते धृत्वा अधून्वन् । अकस्मात् एव घण्टानादः अजायत। घण्टानादेन चकिताः ते पुनः पुनः घण्टामधून्वन् घण्टनादं च अश्रुण्वन्।

चित्रपुरनागरिकाः वारं वारं वनप्रदेशात् घण्टानादं श्रुत्वा भयाकुलाः । ते अचिन्तयन् नूनं तस्मिन् प्रदेशे घण्टाकर्णः नाम राक्षसः वर्तते, यः मनुष्यान् खादति घण्टां च वादयति इति। अतः भीत्या पौरजनाः अन्यत्र गन्तुं प्रारभन्त। तथा चिन्ताकुलः नृपः उद्घोषयत् यः घण्टाकर्णं मारयति तस्मै बहूनि सुवर्णानि दास्यामि इति। तत् श्रुत्वा काचन वृद्धा वनं गत्वा तत्र किञ्चित् कालं निर्भयं अवसत्। वानराः एव घण्टां वादयन्ति इति सा अवागच्छत्। अन्येद्युः सा वानरेभ्यः मधुराणि फलानि अयच्छत्। ते वानराः यदा फलखादनमग्नाः जाताः तदा सा घण्टामादाय नृपं प्रत्यागच्छत्। अवदत् च "हे राजन्! घण्टाकर्णः हतः मया" इति। राजा तदा सेवकान् अपृच्छत् - "हे सेवकाः! अस्याः वाक्यं सत्यं वा?" इति सेवकाः ताम् एवमपृच्छन् "हे अम्ब!, अत्रागच्छ, भवत्या उक्तं सत्यं वा"?





"अयि भोः ! सत्यमेव । अद्य प्रभृति तादृशं शब्दं भवद्भिः श्रोतुं न शक्येत" इत्युत्तरमदात्।

सन्तुष्टो राजा तस्यै वृद्धायै प्रभूतं धनमदात्। भयान्मुक्ताः जनाः नगरमागत्य ससुखं न्यवसन्।

भयशीलः सदा भीतो
येन केनापि हेतुना।
परीक्ष्यैवाधिगच्छन्ति
धीरास्तु भयकारणम्।।

## पदच्छेदः

अथैकदा - अथ +एकदा।

प्रत्यागच्छत् - प्रति +आगच्छत्।

इत्यपृच्छत् - इति + अपृच्छत्।

सन्तुष्टो राजा - सन्तुष्टः + राजा।

भयान्मुक्ताः - भयात् + मुक्ताः।

## विग्रहवाक्यानि

पौरजनाः - पुरे भवाः पौराः, ते च जनाश्च पौरजनाः।

सन्तुष्टः - सन्तोषेण सहितः।

निर्भयम् - निर्गतं भयं यस्मिन् कर्मणि यद्यथा तथा।

भयशीलः - भयं शीलं यस्य सः भयशीलः।

**यदा-तदा**

उदा- यदा अध्यापिका कक्ष्यां प्रविशति तदा छात्राः उत्तिष्ठन्ति।

## क्रियापदपरिचयः।

| | | |
|---|---|---|
| आगच्छन् | - | आ +गम् धातोः परस्मैपदि लङ् प्र.पु बहुवचनम्। |
| अधून्वन् | - | धूञ् (धू) धातोः परस्मैपदि लङ् प्र.पु ब.व। |
| अश्रुण्वन् | - | श्रु धातोः परस्मैपदि , लङ् प्र.पु ब.व। |
| प्रारभन्त | - | प्र+ आ +रभ् धातोः आत्मनेपदि लङ् प्र.पु ब,.व। |
| दास्यामि | - | दा धातुः परस्मैपदि लृट् उ.पु एकवचनम्। |
| प्रत्यागच्छन् | - | प्रति +आ +गम् धातोः परस्मैपदि ,लङ् प्र.पु. ब.व। |
| अदात् | - | दा धातोः परस्मैपदि लङ् प्र.पु ए.व। |
| न्यवसन् | - | नि +वस् धातोः परस्मैपदि, लङ् प्र.पु ब.व। |

श्लोकः- भयशील............. भयकारणम्।

**अन्वयः**- भयशीलाः सदा भीताः धीरास्तु येन केनापि हेतुना भयकारणं परीक्ष्यैव अधिगच्छन्ति।

## अनुबन्धः

### अव्ययानि

सदृशं त्रिषु लिंगेषु
सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु
यन्न व्येति तदव्ययम्।

क्त्वा प्रत्ययान्तं क्त्वान्तम्। उदा- धृत्वा। गत्वा। पीत्वा।

ल्यप्प्रत्ययान्तं ल्यबन्तम्। उदा- अनुगम्य। उपगम्य। संस्थाप्य

तुमुन् प्रत्ययान्तं तुमुन्नन्तम्। उदा- पठितुम्, गन्तुम्, स्थातुम्।

**संबोधनान्तरूपाणि।**

हे राजन्! हे सेवकाः! हे वृद्धे! अयि भोः!।

**कर्तरि कर्मणि प्रयोगः।**

कर्तरिप्रयोगः, कर्मणिप्रयोगः, भावेप्रयोगः इति प्रयोगाः त्रिविधः। कर्तरि, कर्मणि, भावे इति शब्दाः कर्तृ ,कर्म, भाव शब्दानां सप्तमीविभक्तौ रूपाणि भवन्ति।

कर्तरिप्रयोगे कर्ता प्रथमा विभक्तौ, कर्म द्वितीया विभक्तौ च भवतः। क्रियायाः पुरुष वचने च कर्त्रनुसारिणी च भवतः।

उदा गणेशः सूर्यं पश्यति।

कर्मणिप्रयोगे कर्ता तृतीयाविभक्तौ कर्म प्रथमाविभक्तौ च भवति। क्रिया कर्मानुसारिणी भवति।

उदा- आचार्येण शिष्यः उपदिश्यते।

भाव प्रयोगे- कर्ता तृतीया विभक्तौ भवति। कर्म नास्ति। क्रिया सदा प्रथमपुरुषैकवचनान्ता भवति।

उदा- फलैः पत्यते।

## पठनप्रवर्तनानि।



उदाहरणानुसारं पदानि विश्लेषयतु।

| | | |
|---|---|---|
| अथैकदा | - | अथ + एकदा। |
| अथैनम् | - | ............ । |
| प्रत्यागच्छत् | - | प्रति +आगच्छत्। |
| इत्यपृच्छत् | - | ............ । |
| सन्तुष्टो राजा | - | सन्तुष्टः +राजा। |
| सन्तुष्टो युवकः | - | .................। |
| भयान्मुक्ताः | - | भयात् + मुक्तः। |
| जीवन्मुक्तः | - | .................। |

*श्रद्धेयाः अंशाः।* पदार्थबोधः।

विश्लेषणसामर्थ्यम्।



उदाहरणानुसारं समस्तपदं लिखतु।

| | | |
|---|---|---|
| भयं विना | - | निर्भयम्। |
| दोषं विना | - | ..................। |
| आतङ्कं विना | - | ..................। |
| अहङ्कारं विना | - | ..................। |
| ससुखम् | - | सुखेन सह वर्तते। |

KT 285-4/Sanskrit - 8 (O/S)

सस्नेहम्  -  ..................।

सामोदम्  -  ..................।

सानन्दम्  -  ..................।

*श्रद्धेयौ अंशौ*  विग्रहार्थग्रहणम्।

समस्तपदज्ञानम्।



पाठभागे विद्यमानानि संबोधनान्तरूपाणि चित्वा लिखतु।

उदा- हे राजन्।

श्रद्धेयौ अंशौ-  विभक्तिज्ञानम्।

पदावबोधः।



दत्तानि पदानि पट्टिकारूपेण लिखतु।

(चरितुं, भूत्वा, संभूय, निशम्य, पीत्वा, अनुभूय, चलितुं, धावित्वा. नर्तितुं)

| क्त्वान्तं | ल्यबन्तं | तुमुन्नन्तम् |
|---|---|---|
| भूत्वा | संभूय | चरितुं |
| | | |

*श्रद्धेयाः अंशाः*  अव्ययज्ञानम्।

अर्थबोधम्।

पट्टिकाकरणम्।

 पाठभागं पठित्वा चोरणम् आपदः कारणम् इति विषयमधिकृत्य चर्चां करोतु संभाषणरूपेण लिखतु।

*श्रद्धेयाः अंशाः।* आशयग्रहणम्।

संबोधनरूपाणां ज्ञानम्।

उचितसंभाषणलेखनम्।

 समानकथाः सञ्चित्य लिखतु, कथासम्पुटं रचयतु।

*श्रद्धेयाः अंशाः* आशयावबोधः।

आकर्षकत्वम्।

वाक्यघटना।

 कथाभागं पठित्वा संघे स्थित्वा नाटकरूपेण अवतारयतु।

*श्रद्धेयाः अंशाः* उचितभावः।

उचितवेषः।

अवतरणशैली।

संभाषणव्यक्तता।

ईकारान्त स्त्रीलिङ्गशब्दः नदी

| | **ए.व** | **द्वि.व** | **ब.व** |
|---|---|---|---|
| प्र. | नदी | नद्यौ | नद्यः |
| सं.प्र | हे नदि! | हे नद्यौ! | हे नद्यः! |
| द्वि. | नदीं | नद्यौ | नदीः |
| तृ. | नद्या | नदीभ्यां | नदीभिः |
| च. | नद्यै | नदीभ्यां | नदीभ्यः |
| प. | नद्याः | नदीभ्यां | नदीभ्यः |
| ष. | नद्याः | नद्योः | नदीनाम् |
| स. | नद्याम् | नद्योः | नदीषु। |

धूञ् धातुः परस्मैपदी लङ् रूपाणि

| | **ए.व** | **द्वि.व** | **ब.व** |
|---|---|---|---|
| प्र.पु | अधूनोत् | अधूनुताम् | अधून्वन् |
| म.पु | अधूनोः | अधूनूतम् | अधूनुत |
| उ.पु | अधून्वम् | अधूनुव-अधून्व | अधूनुम, अधून्म |

अदात् दा धातुः परस्मैपदी लङ् रूपाणि

| | **ए.व** | **द्वि.व** | **ब.व** |
|---|---|---|---|
| प्र.पु. | ददाति | दत्तः | ददति। |
| म.पु. | ददासि | दत्थः | दत्थ |
| उ.पु | ददामि | दद्वः | दद्मः |

# किमधिगतम्

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशः निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | पदविश्लेषणम्। | | | | |
| २. | समस्तपदलेखनम्। | | | | |
| ३. | सम्बोधनान्तरूपाणां लेखनम्। | | | | |
| ४. | पट्टिकाकरणम्। | | | | |
| ५. | सम्भाषणलेखनम्। | | | | |
| ६. | कथासपुंटनिर्माणम्। | | | | |
| ७. | नाटकावतरणम्। | | | | |

*

१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

# शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| अजिनम् | मृगचर्म | മൃഗചർമ്മം | skin of animal |
| अतिप्राचीनम् | अतिपुरातनम् | വളരെ പഴയത് | very old |
| अदर्शयत् | दर्शयामास | കണ്ടു/കാണിച്ചു | showed |
| अधीत्य | पठित्वा | പഠിച്ചിട്ട് | being learned |
| अधून्वन् | शब्दमकुर्वन् | ശബ്ദമുണ്ടാക്കി | made voice |
| अध्ययनाय | पठनाय | പഠിക്കുന്നതിന് വേണ്ടി | for learning |
| अपहृतानि | चोरितानि | അപഹരിക്കപ്പെട്ടത് | stollen |
| अब्रवीत् | उवाच | പറഞ്ഞു | said |
| अभितः | उभयोः पार्श्वयोः | ഇരുവശത്തും | around |
| अभिधीयन्ते | कथ्यन्ते | പറയപ്പെടുന്നു | it is said |
| अयनम् | मार्गः | മാർഗ്ഗം/വഴി | way |
| अवगाहन्ते | निमज्जन्ति | മുങ്ങുന്നു | immersed |
| आदित्यः | सूर्यः | സൂര്യൻ | sun |
| आप्यते | प्राप्यते | പ്രാപിക്കുന്നു | attained |
| आहुः | वदन्ति | പറയുന്നു | says |
| उद्घोषणम् | प्रख्यापनम् | പ്രഖ്യാപനം | proclamation |
| कुतूहलम् | कौतुकम् | കൗതുകം | curiosity |
| कुसुमम् | पुष्पम् | പൂവ് | flower |
| चोरः | तस्करः | കള്ളൻ | thief |
| तीररुहः | तटजः | തീരങ്ങളിലുണ്ടായ | grown op on the boder of the river |
| नलिनम् | कमलम् | താമര | lotus |
| निर्भयम् | भयं विना | ഭയമില്ലാതെ | without fear |
| पश्य | त्वं पश्य | നീ കണ്ടാലും | you see |
| पादपः | वृक्षः | മരം | tree |

| | | | |
|---|---|---|---|
| पुरवासः | नगरवासः | നഗരവാസം | living in city |
| पुष्करम् | नीलसरोरुहम् | നീലത്താമര | blue lotus |
| प्रारभन्तः | आरभन्त | ആരംഭിച്ചു | began |
| प्रभूतम् | बहु | ധാരാളം | many |
| भामिनि | सुन्दरि | സുന്ദരി | beautiful lady |
| भीत्या | भयेन | ഭയത്താൽ | by fear |
| मनसि | चित्ते | മനസ്സിൽ | in mind |
| मनीषिणः | पण्डिताः | പണ്ഡിതന്മാർ | scholars |
| मग्नः | व्यापृतः | മുഴുകി | indulged |
| मन्ये | चिन्तयामि | കരുതുന്നു | consider |
| मन्दिरः | देवालयः | ദേവാലയം | temple |
| मूर्तिः | शरीरम् | ശരീരം | body |
| राजराजस्य | कुबेरस्य | കുബേരന്റെ | kubera's |
| राजन्तीम् | विलसन्तीम् | ശോഭിക്കുന്ന | shining |
| वरारोह | कुलीना | ഉന്നതകുലജാതയായ | born in royal family |
| वाङमयम् | साहित्यम् | സാഹിത്യം | literature |
| विगाहस्व | निमज्ज | മുങ്ങിയാലും | dip in water |
| विनिष्क्रम्य | अवतीर्य | ഇറങ്ങിയിട്ട് | being alighted |
| शुभजलम् | शुद्धजलम् | ശുദ്ധജലം | pure water |
| शैलः | पर्वतः | പർവതം | mountain |
| सम्यक् | सुष्ठु | നല്ലവണ്ണം | very good |
| सहसा | शीघ्रम् | പെട്ടെന്ന് | suddenly |
| सारसः | बकः | കൊക്ക് | crane |
| सिद्धः | मुनिः | മുനി | saint |
| सुता | पुत्री | പുത്രി | daughter |
| हतः | मारितः/व्यापादितः | കൊല്ലപ്പെട്ടു | being killed |
| हंसः | मरालः | അരയന്നം | swan |

# एककम्-२
# मुखं व्याकरणम्

भारतीयसंस्कारो वेदाधीन एव। वेदस्य मुखमेव भवति व्याकरणम्। व्याकरणपठनेन भाषाशुद्धिः प्रयोगपटुत्वं च सिद्ध्यति। अपि च सर्वशास्त्रोपकारकं च। व्याकरणशास्त्रे पाणिनिकृतं पाणिनीयं सर्वोत्कृष्टम्। पाणिनीयस्य प्रथामं प्रधानं च सोपानं भवति संज्ञाप्रकरणम्।

**पठनाधिगमाः**

* माहेश्वरसूत्राणि पठति।
* सूत्रान्तर्गतवर्णान् लिखति।
* प्रत्याहारं निर्माति।
* स्थानसाम्यानुसारं वर्णानि उच्चारयति।
* सूत्राणां वृत्तिं पठित्वा सूत्रं लिखति।

# चतुर्थः पाठः

# संज्ञाप्रकरणम्

शास्त्रेषु नैपुणी येषां तेऽपि मुह्यन्ति कुत्रचित्।
किं शुद्धं किमशुद्धं स्यादिति कष्टं विवेचनम्।।
पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं , त्याज्यं न किञ्चन।।

शास्त्रेषु कुशलाः पण्डिताः अपि कदाचित् उचितपदानां प्रयोगे असमर्थाः भवन्ति। तदा तादृशानां कृते उपकारकं भवति पाणिनिना विरचितं पाणिनीयम् अथवा अष्टाध्यायी। शास्त्रस्यास्य सोपानं भवति संज्ञाप्रकरणम्। वस्तुतामिमां मनसि निधाय अष्टमे वर्गे संज्ञाप्रकरणम् समायोजितम्।

**नृत्तावसाने नटराजराजौ ननाद ढक्कां नवपञ्चवारम्।**

**उध्दर्तुकामः सनकादिसिध्दानेतद्विमर्शे शिवसूत्रजालम्।।**

(ननाद- नादयामास)




**१. अइउण्।** **२. ऋलृक्।** **३. एओङ्।**

**४. ऐऔच्।** **५.हयवरट्।** **६. लण्।**

**७. ञमङणनम्।** **८.झभञ्।** **९. घढधष्।**

**१०.जबगडदश्।** **११.खफछथचटतव्।** **१२.कपय्।**

**१३. शषसर्।** **१४.हल्।**

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। एषामन्त्या इतः। हकारादिष्वकार उच्चारणार्थः। लण् मध्ये त्वित्संज्ञकः।

अण् आदिः एषां ते अणादयः, अणादयश्च ताः संज्ञाश्च अणादिसंज्ञाः। ताः अर्थः (प्रयोजनं) येषां तानि अणादिसंज्ञार्थानि। अणादिसंज्ञाभ्यः इमानि अणादिसंज्ञार्थानि। अन्ते भवाः अन्त्याः णकारादिवर्णाः इत्संज्ञकाः। लण् सूत्रे लकारात्परोऽकारश्च इत्संज्ञकः ज्ञातव्यः इत्यर्थः।

१. **हलन्त्यम्** ।२।३।३

उपदेशेऽन्त्यं हलित्स्यात्। उपदेश आद्योच्चारणम्। आद्यानां शिवपाणिनि-वररुचीनामुच्चारणम्।

२. **अदर्शनं लोपः** २।२।६०।

प्रसक्तस्याऽदर्शनं लोपसंज्ञं स्यात्।

३. **आदिरन्त्येन सहेता** २।२।७१।

अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। यथा अण् इति अ, इ, उ वर्णानां संज्ञा। एवम् अच् , हल् अलित्यादयः।

४. **ऊकालोऽज्झ्रस्वदीर्घप्लुतः** २।२।२९।


ऊकालः अच् ह्रस्वदीर्घप्लुतः इति पदच्छेदः। उश्च, ऊश्च ऊ३श्च वः। वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। उकालः (एकमात्रः अच् ह्रस्वः ऊकालः (द्विमात्रः) अच् दीर्घः। ऊ३कालः (त्रिमात्रः) अच् प्लुतः।

५. **मुखनासिकावचनोऽनुनासिकः २।२।८**

मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्।

६. **तुल्यास्यप्रयत्नं सवर्णम् २।२।९।**

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येदद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्।




**वर्णानां स्थानानि**

**अकुहविसर्जनीयानां कण्ठः।**

अकारः, कवर्गः, हकारः विसर्गश्च। एते कण्ठ्याः।

**इचुयशानां तालु।**

इकारः, चवर्गः, यकारः, शकारश्च तालव्याः।

**ऋटुरषाणां मूर्धा।**

ऋकारः, टवर्गः, रेफः, षकारश्च, मूर्धन्याः।

लृतुलसानां दन्ताः। ऋकारः तवर्गः लकारः सकारश्च दन्त्याः।

**उपूपध्मानीयानामोष्ठौ।**

उकारः, पवर्गः, उपध्मानीयश्च, ओष्ठ्याः। प फ उपद्मानीयः। पफाभ्यां प्रागर्धविसर्गसदृशः उपध्मानीयः।

**ञमङणनानां नासिका च।**

वर्गान्त्यानां स्वस्ववर्गानुकूलस्थानं नासिका च।

**एदैतोः कण्ठतालु।**

ए, ऐ, एतौ कण्ठ्यतालव्यौ।

**ओदौतोः कण्ठेष्ठम्।**

ओ, औ, एतौ कण्ठ्योष्ठ्यौ।

**वकारस्य दन्तोष्ठम्।**

वकारस्य दन्तः ओष्ठश्च।

**जिह्वामूलीयस्य जिह्वामूलम्।**

क ख इति कखाभ्यां प्रागर्धविसर्गसदृशः, जिह्वामूलीयः।

**नासिकानुस्वारस्य-**

यत्नो द्विधा- आभ्यन्तरो ब्राह्यश्च। आद्यः पञ्चधा- स्पृष्टेषत्पृष्टेषद्विवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। ईषद्विवृतमूष्मणाम्। विवृतं स्वराणाम्। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव।

८. **परः सन्निकर्षः संहिता २।४।२०१।**

वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्। परः अतिशयितः। सन्निकर्षः सामीप्यम्। अर्धमात्राधिककालव्यवधानाभावः। यदि संहिता अस्ति तर्हि सन्धिः भवति।

**हलोऽनन्तराः संयोगः २।२।७१।**

अज्भिः अव्यवहिताः हलः संयोगसंज्ञाः स्युः।

९. **सुप्तिङन्तं पदम् १।४।२४।**

सुबन्तं तिङन्तं च पदसंज्ञं स्यात्।

१०. **अदेङ्गुणः २।२।२।**

अत् एङ् च गुणसंज्ञः स्यात्।

(अ, ए, ओ, एते गुणवर्णाः)

११. **वृद्धिरादैच् १।१।१।**

आदैच् वृद्धिसंज्ञः स्यात्।

१२. **उपदेशेऽजनुनासिकः इत् १।३।२१।**

उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात्। प्रतिज्ञानुनासिक्याः पाणिनीयाः। लण् सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा।।

**१३. उपसर्गाः क्रियायोगे २।४।५१।**

प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः। प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर् वि, आङ् नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप, एते प्रादयः।

**१४. भूवादयो धातवः २।३।२१।**

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः।

**१५. विरामोऽवसानम् २।४।१२०।**

वर्णानामभावोऽवसानसंज्ञः स्यात्।

## पठनप्रवर्तनानि



**माहेश्वरसूत्राणि पठित्वा तदन्तर्गतान् वर्णान् लिखतु।**

| **माहेश्वरसूत्राणि** | **वर्णाः** |
|---|---|
| अइउण् | |
| कपय् | |
| हयवरट् | |
| घढधष् | |
| ञमङणनम् | |

*श्रद्धेयौ अंशौ* माहेश्वरसूत्रग्रहणम्।

उचितवर्णलेखनम्।



**माहेश्वरसूत्राणि पठित्वा अधोदत्तेषु प्रत्याहारेषु अन्तर्भूतान् वर्णान् विविच्य लिखतु।**

अच्, अल्, अक्, शर्, एच्, अण्, हश्, इण्, अश्, इच्।

*श्रद्धेयाः अंशाः* माहेश्वरसूत्रज्ञानम्।

प्रत्याहाराणां ज्ञानम्।

वर्णानां विवेचनम्।



**अधो दत्ताः वर्णाः कस्मिन् प्रत्याहारे अन्तर्भवन्ति इति लिखतु।**

ए ओ ऐ औ

इ उ ऋ लृ

श ष स

ज ब ग ड द श

अ इ उ ऋ लृ ए ओ ऐ औ

*श्रद्धेयौ अंशौ:-* माहेश्वरसूत्रज्ञानम्।

उचितस्य प्रत्याहारस्य लेखनम्।



**स्थानसाम्यानुसारं वर्णानां स्थानं लिखतु।**

१. ह अ ख ।

२. झ य इ श ।

३. ढ र ऋ ष ट।

४. औ औ।

५. ए ऐ।

*श्रद्धेयाः अंशाः* वर्णानां उच्चारणस्थानग्रहणम्।

स्पष्टोच्चारणम्।

स्थानसाम्यानुसारं लेखनम्।



**अधोदत्तान् वर्णान् यथोचितं पट्टिकायां निवेशयतु।**

(ए, ओ, ऐ, औ, र, व, ट, ष)

| कण्ठतालु | मूर्धा | दन्तोष्ठम् | कण्ठोष्ठम्। |
|---|---|---|---|
| | | | |

*श्रद्धेयौ अंशौ* स्थानसाम्यानुसारं उच्चारणम्।

पट्टिकाकरणम्।



अधोदत्तानां सूत्राणां व्याख्यानं लिखतु।

अदर्शनं लोपः।

सुप्तिङन्तं पदम्।

अदेङ् गुणः।

वृद्धिरादैच्।

*श्रद्धेयाः अंशाः* सूत्रार्थग्रहणम्।

वृत्तिलेखनम्।

व्याख्यानलेखनम्

# किमधिगतम्

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशः निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | सूत्रान्तर्गतानां वर्णानां लेखनम्। | | | | |
| २. | प्रत्याहारेषु अन्तर्भूतानां वर्णानां विवेचनम्। | | | | |
| ३. | प्रत्याहारलेखनम्। | | | | |
| ४. | स्थानसाम्यानुसारं वर्णानां स्थानलेखनम्। | | | | |
| ५. | पट्टिकाकरणम्। | | | | |
| ६. | सूत्राणां व्याख्यानलेखनम्। | | | | |
| | | | | | |

*

१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

# एककम्- ३

# काव्यभूषणम्

**कवेः कर्म काव्यम्। काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते। काव्यशोभावर्धने अलङ्काराः नितरां उपकारकाः। पद्यं छन्दोमयम्। चतुष्पदी पद्यम्। पद्यं वृत्तानुसारि भवेत्। अस्मिन्नेकके उपमा दीपकम् स्वभावोक्तिः इति त्रयः अलङ्काराः अनुष्टुप् इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः चेति वृत्तचतुष्टयं च आयोजितम्।**

पठनाधिगमाः

* श्लोकान् पठित्वा अलङ्कारान् विवेचयति।
* अलङ्काराः लक्ष्यलक्षण समन्वयपूर्वकं लिखति।
* श्लोकान् पठित्वा अलङ्कारान् निर्णयति।
* गणव्यवस्थां पठति।
* लक्षणम् उदाहरणं च पठति।
* वृत्तं निर्णयति।
* वृत्तानुसारं आलपति।

# पञ्चमः पाठः

# अलङ्कारः

काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते। शब्दालङ्कारः अर्थालङ्कारः चेति अलङ्कारौ द्विविधौ। यः अलङ्कारः अर्थस्य चमत्कारितां जनयति सः अर्थालङ्कारः। पाठेऽस्मिन् उपमा , दीपकं, स्वभावोक्ति इति त्रयः अलङ्काराः सोदाहरणं प्रतिपाद्यन्ते।

**उपमालङ्कारः**

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।**
**हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते।।**

यत्र उपमानोपमेयोः सहृदयहृदयाह्लादकत्वेन सादृश्यं भाति व्यक्ततया स्पष्टं प्रकाशते तत्र उपमालङ्कारः। अत्र उदाहरणे हे कृष्ण ते कीर्तिः हंसी इव स्वर्गङ्गाम् अवगाहते। अत्र कीर्तिहंस्योः सादृश्य लक्ष्मीः स्पष्टं प्रकाशते इति उपमालङ्कारः।

अत्र हंसी उपमानं , कीर्तिः उपमेयं, स्वर्गङ्गावगाहनं साधारणधर्मः, इवशब्दः उपमावाचकः च। चतुर्णामपि संभवात् इयं पूर्णोपमा।

उपमायाम् एकस्य द्वयोः त्रयाणां वा अभावे लुप्तोपमा।

**दीपकालङ्कारः**

**वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः।**

**मदेन भाति कलभः प्रतापेन महीपतिः।।**

वर्ण्यावर्ण्यानाम् उपमेयोपमानानां एकधर्मान्वये दीपकम्। मदेन भाति इत्युदाहरणम्। कलभः, गजः मदेन भाति शोभते। प्रतापेन महीपतिः राजा च शोभते। अत्र उपमेयस्य राज्ञः उपमानस्य कलभस्य च भाति इति क्रिययामन्वयः। अतः दीपकालङ्कारस्य उदाहरणं भवति।

**स्वभावोक्त्यलङ्कारः**

**स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्।**

**कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते।।**

स्वभावस्य उक्तिः स्वभावोक्तिः। स्वाभाविकरीत्या जात्यादिस्थस्य वर्णनं स्वभावोक्तिः। कुरङ्गैरुत्तर इत्युदाहरणम्। कुरङ्गैः उत्तराङ्गाक्षैः स्तब्धकर्णैः निश्चलकर्णैः च ऊर्ध्वं वीक्ष्यते। अत्र कुरङ्गानां जातिवर्णनात् स्वभावोक्तिः।

## पठनप्रवर्तनानि



**अधः प्रदत्तान् श्लोकान् पठित्वा उपमायाः चतुरः घटकान् विविच्य लिखतु।**

तस्यालमेषा क्षुधितस्य तृप्त्यै

प्रदिष्टकाला परमेश्वरेण।

उपस्थिता शोणितपारणा मे
सुरद्विषश्चान्द्रमसी सुधेव।।

*श्रद्धेयौ अंशौ* :- उपमाज्ञानम्।
घटकानां विविच्य लेखनम्।



**अधोदत्तश्लोकानां अलङ्कारं निर्णयतु।**

क. कण्डूयमानेन कटं कदाचिद्
वन्यद्विपेनोन्मथिता त्वगस्य।
अथैनमद्रेस्तनया शुशोच
सेनान्यमालीढमिवासुरास्त्रैः।।

ख. मणिः शाणोल्लीढः समरविजयी हेतिदलितो
मदक्षीणो नागः शरदि सरितः स्नानपुलिनाः।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः।।

ग. समुद्वहन्तं सलिलातिभारं
बलाकिनो वारिधरा नदन्तः।
महत्सु शृङ्गेषु महीधराणां
विश्रम्य विश्रम्य पुनः प्रयान्ति।।

*श्रद्धेयाः अंशाः* :- आशयग्रहणम्।

अर्थावगमनम्।

अलङ्कारज्ञानम्।

विविच्य लेखनम्।



**लक्ष्यलक्षणसमन्वयपूर्वं लिखतु।**

क. उपमा।

ख. स्वभावोक्तिः।

श्रद्धेयाः अंशाः :- अर्थग्रहणम्।

अलङ्कारज्ञानम्।

लक्ष्यलक्षणपूर्वकं समर्थनम्।



**उपमा, दीपकं, स्वभावोक्ति अलङ्कारयुक्तानां श्लोकानां चयनम्।**

*श्रद्धेयाः अंशाः* :- अलङ्कारज्ञानम्।

श्लोकानाम् अर्थग्रहणम्।

उचितश्लोकचयनम्।

# किमधिगतम्

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशः निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | उपमायाः घटकानां लेखनम्। | | | | |
| २. | अलंकारनिर्णयम्। | | | | |
| ३. | लक्ष्यलक्षणसमन्वयः। | | | | |
| ४. | श्लोकचयनम्। | | | | |
| | | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

# षष्ठः पाठः

# वृत्तम्

पद्यं छन्दोबद्धम्। तच्च वृत्तं जातिरिति द्विधा भवति। वृत्तम् अक्षरसङ्घातम्। जातिः मात्रकृता च भवेत्। यथा आर्या, गीतिः इत्यादयः। तथा अनुष्टुप्, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, इत्यादीनि वर्णवृत्तानि भवन्ति।

वर्णवृत्तेषु प्रतिपादं वर्णानां संख्या नियता भवति। वर्णाः लघवः, गुरवः चेति द्विविधाः। लघुः वक्ररेखया ( ˘ ) गुरुः ऋजुरेखया (-) च सूच्यते।

वर्णवृत्तेषु नियतानां गणानां क्रमः व्यवस्थितः। गणव्यवस्था तु वर्णाश्रिता। वर्णत्रयात्मकः एको गणः। वर्णानां गुरुलघुभेदात् गणाः अष्टविधाः भवन्ति।

**आदिमध्यावसानेषु यरता यान्ति लाघवम्।**
**भजसा गौरवं यान्ति मनौ तु गुरुलाघवौ।।**

इति अष्टविधः गणक्रमः।

यथा-

| | | |
|---|---|---|
| आदिलघुः | **यगणः** | ˘ - - उपेन्द्रः। |
| मध्यलघुः | **रगणः** | -˘ - पीडितः। |
| अन्त्यलघुः | **तगणः** | - -˘ रामस्य |

| | | |
|---|---|---|
| आदिगुरुः | **भगणः** | -˘˘ गायति |
| मध्यगुरुः | **जगणः** | ˘ - ˘ लिखन्ति। |
| अन्त्यगुरुः | **सगणः** | ˘ ˘ - रजकः। |
| सर्वगुरुः | मगणः | – - - राजीवः। |
| सर्वलघुः | नगणः | ˘ ˘ ˘ पतति |

**अनुष्टुप्**

**श्लोके षष्ठं गुरुर्ज्ञेयं सर्वत्र लघु पञ्चमम्।**
**द्विचतुष्पादयोः ह्रस्वं सप्तमं दीर्घमन्ययोः।।**

सर्वेषु पादेषु षष्ठः वर्णः गुरुः भवति। सर्वेषु पादेषु पञ्चमवर्णः लघुः। द्वितीयचतुर्थयोः पादयोः सप्तमवर्णः ह्रस्वः एव। प्रथमे तृतीये च पादे सप्तमं दीर्घं च स्यात्। एवं प्रतिपादमष्टौ वर्णाः।

वागर्थाविवसंपृक्तौ
वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे
पार्वतीपरमेश्वरौ।।

**इन्द्रवज्रा**

**स्यादिन्द्रवज्रा यदि तौ जगौ गः।**

प्रतिपादं तगणद्वयं जगणः गुरुद्वयं चेति। एकादशवर्णाः यदि स्युः तर्हि इन्द्रवज्रा वृत्तम्। पादान्ते यतिः कल्पनीया। (श्लोकेषु विश्रमस्थानं यतिरित्यभिधीयते)

त त ज गु गु

- - ˘ - - ˘ ˘ - ˘ - -

ये चन्द्र । चूडाच। लचाल। नौक

- - ˘ - - ˘ ˘ - ˘ - -

चातुर्य। चिन्ताम । णयोभु। जा मे।
तैरेव भूयिष्ठतरैः प्रवृत्त-
श्चापाधिरोपाय कथं न लज्जे।।

अत्र तगणतगणजगणाः गुरुः इति क्रमशः भवन्ति इत्यतः इन्द्रवज्रा। प्रथमपादे अन्तिमवर्णस्य ककारस्य पादान्तात् गुरुः। पादान्ते वर्तमानं लघुं गुरुत्वेन कल्पनीयम् आवश्यकं चेत्।

**उपेन्द्रवज्रा**

**उपेन्द्रवज्रा जतजास्ततो गौ।**

प्रतिचरणं जगणः तगणः जगणः गुरुद्वयं चेति एकादश वर्णाः भवन्ति चेत् तद् वृत्तमुपेन्द्रवज्रेति कथ्यते।

ज त ज गु गु

उदा- ˘ - ˘ - - ˘ ˘ - ˘ - -

अलं म। हीपाल। तव श्र। मेण

˘ -˘ - - ˘ ˘ - ˘ - -

प्रयुक्त। मप्यस्त्र। मितोवृ। था स्यात्।

न पादपोन्मूलनशक्ति रंहः

शिलोच्चये मूर्छति मारुतस्य।

अस्मिन्नुदाहरणे प्रतिपादं जगणतगणजगणाः गुरुद्वयं च सन्ति। पादान्ते यतिश्च। अतः उपेन्द्रवज्रा।

**उपजातिः** **अनन्तरोदीरितलक्ष्मभाजौ**

**पादौ यदीयावुपजातयस्ताः।।**

इन्द्रवज्रोपेन्द्रवज्रा लक्षणयोः एकस्यैव श्लोकस्य पादेषु मिश्रणं चेत् उपजातिः भवति।

त त ज गु गु

- - ˘ - - ˘ ˘ - ˘ - -

अस्त्युत्त । रस्यां दि। शि देव। तात्मा

ज त ज गु गु

˘ - ˘ - - ˘ ˘ - ˘ - -

हिमाल । यो नाम । नगाधिराजः

पूर्वापरौ तोयनिधी वगाह्य

स्थितः पृथिव्या इव मानदण्डः।।

प्रथम तृतीय पादयोः इन्द्रवज्रायाः, द्वितीय चतुर्थपादयोः उपेन्द्रवज्रायाः च अस्मिन् श्लोके लक्षणसमन्वितं भवति अत्र उपजातिः नाम वृत्तम्।

## पठनप्रवर्तनानि



### पेटिकायां दत्तानां पदानां गणनिर्णयं करोतु।

| | | |
|---|---|---|
| पठति | गच्छति | लिखति |
| जननि | मारुतः | चकार |
| यशोद | विरामं | भुवनः |
| दिलीपः | यदियं | नियुज्य |
| मानसं | | |

श्रद्धेयौ अंशौ — लघु गुरोभ्यां यथास्थाने अङ्कनम्।
गणस्य उचित नाम लेखनम्।



### अधो दत्तानां श्लोकानां वृत्तं निर्णयतु।

अथ प्रयाति प्रहरे यशोदा
जने च किञ्चिन्निभृते सनिद्रे।
पुत्रं पयः पानगुरुप्रमोदं
प्रस्वापयन्ती कलमित्यगायत्।।

बाहुप्रतिष्टम्भ विवृद्धमन्युः।

अभ्यर्णमागस्कृतमस्पृशद्भिः।

राजा स्वतेजोभिरदह्यतान्तः

भोगीव मन्त्रौषधिरुद्धवीर्यः।।

अधः कदाचिच्छकटस्य शायितः

स्वकार्यपर्याकुलया यशोदया।

स लीलया पादसरोरुहं शनै-

रुदञ्चयामास सरोजलोचनः।।

*श्रद्धेयाः अंशाः* :- **गुरुणां लघुणां विवच्य ज्ञानम्।**

वृत्तज्ञानम्।

वृत्तविवेचनम्।



**अधोदत्तस्य श्लोकस्य गुरुं, लघुं निर्णयतु।**

श्रीपतिं प्रणिपत्याहं

श्रीवत्साङ्कितवक्षसम्।

श्रीरामोदन्तमाख्यास्ये

श्रीवाल्मीकिप्रकीर्तितम्।

*श्रद्धेयाः अंशाः-* गुरुलघुज्ञानम्।

विवेचनम्।



वृत्तं लक्षणसहितं समर्थयतु।

१. इन्द्रवज्रा

२. उपेन्द्रवज्रा

*श्रद्धेयौ अंशौ* :- वृत्तनिबद्धानां श्लोकानां चयनम्।

समर्थनम्।



श्रद्धेयौ अंशौ :- वृत्तज्ञानम्।

श्लोकचयनम्।

# किमधिगतम्

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशः निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | गणनिर्णयः कृतः। | | | | |
| २. | वृत्तनिर्णयः कृतः। | | | | |
| ३. | गुरु-लघु विवेचनं कृतम्। | | | | |
| ४. | वृत्त - लक्षण - समर्थनं कृतम्। | | | | |
| ५. | श्लोकचयनं कृतम्। | | | | |
| | | | | | |
| | | | | | |

*

१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।